# (२३) विनियोगविधिः

अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः । यथा 'दध्ना जुहोती'ति । स हि तृतीयया प्रतिपन्नाङ्गभावस्य दध्नो होमसम्बन्धं विधत्ते । दध्ना होमम्भावयेदिति । गुणविधौ च धात्वर्थस्य साध्यत्वेनैवान्वयः। क्वचिदाश्रयत्वेनापि । यथा दध्नेन्द्रियकामस्य जुहुयादित्यत्र दधिकरणत्वेनेनिन्द्रयं भावयेत् । तच्च किन्निष्ठमित्याकाङ्क्षायां सन्निधिप्राप्तहोम आश्रयत्वेनान्वेति ।। २३ ।।

# (२४) विनियोगविधेः श्रुत्यादिषट्प्रमाणानि

एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि । श्रुति-लिङ्ग-वाक्य- प्रकरण-स्थान-समाख्यारूपाणि । एतत्सहकृतेनानेन विधिनाङ्गत्वं परोद्देशप्रवृत्तकृतिसाध्यत्वरूपं पारार्थ्यापरपर्य्यायं ज्ञाप्यते ।।२४।।

# (२५) श्रुतिनिर्वचनम्

तत्र निरपेक्षो रवः श्रुतिः । सा च त्रिविधा । विधात्री, अभिधात्री, विनियोक्त्री च । तत्राद्या लिङाद्यात्मिका । द्वितीया व्रीह्यादिश्रुतिः । यस्य च शब्दस्य श्रवणादेव सम्बन्धः प्रतीयते सा विनियोक्त्री ।। २५ ।।

# (२६) विनियोक्त्री श्रुतिस्त्रिधा

सापि त्रिविधा । विभक्तिरूपा, एकाभिधानरूपा, एकपदरूपा चेति । तत्र विभक्तिश्रुत्या अङ्गत्वं यथा **व्रीहिभिर्यजेत** इति तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वम् । तदपि पुरोडाशप्रकृतितया । यथा पशोर्हृदयादिरूपहविः प्रकृतितया यागाङ्गत्वम् ।। २६ ।।

# (२७) तृतीयाश्रुतेरन्यदुदाहरणम्

‘अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति’ इत्यस्मिन् वाक्ये अरुणस्यापि तृतीयया श्रुत्या क्रयाङ्गत्वम् । तदपि गोरूपद्रव्यपरिच्छेदद्वारा नतु साक्षात् अमूर्तत्वात् ।। २७ ।।

# (२८) द्वितीयाश्रुतेरुदाहरणम्

‘व्रीहीन्प्रोक्षती’ति प्रोक्षणस्य व्रीह्यङ्गत्वं द्वितीयाश्रुत्या । तच्च प्रोक्षणं न व्रीहिस्वरूपार्थम् । तस्य तेन विनाप्युपपत्तेः । किन्त्वपूर्वसाधनत्वप्रयुक्तम् । व्रीहीनप्रोक्ष्य यागानुष्ठानेऽपूर्वानुपपत्तेः । एवं सर्वेष्वप्यङ्गेष्वपूर्वप्रयुक्तमङ्गत्वं बोध्यम् ।। २८ ।।

# (२९) द्वितीयाश्रुतेरन्यदुदाहरणम्

एवम्

‘इमामगृभ्णन्नशनामृतस्येत्यश्वाभिधानीमादत्त’

इत्यत्र द्वितीयया श्रुत्या मन्त्रस्याश्वाभिधान्यङ्गत्वम्

।। २९ ।।

# (३०) सप्तमीश्रुतिःएकाभिधानश्रुतिश्च

‘यदाऽहवनीये जुहोती’ त्याहवनीयस्य होमाङ्गत्वं सप्तमीश्रुत्या । एवमन्योऽपि विभक्तिश्रुत्या विनियोगो ज्ञेयः । पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वम् ।।३०।।

# (३१) एकपदश्रुतिः

यजेतेत्याख्याताभिहितसंख्याया
आर्थीभावनाङ्गत्वं समानाभिधानश्रुतेः ।
एकपदश्रुत्या च यागाङ्गत्वम् ।। ३१ ।।

# (३२) अमूर्ताया अपि भावनाङ्गत्वम्

न चामूर्तायास्तस्याः कथं भावनाङ्गत्वं वाच्यम् । कर्तृपरिच्छेदद्वारा तदुपपत्तेः । कर्ता चाक्षेपलभ्यः । आख्यातेन हि भावनोच्यते । सा च कर्तारं विनानुपपन्नेति तमाक्षिपति ।।३२।।

# (३३) श्रुतेःप्राबल्यम्

सेयं श्रुतिर्लिङ्गादिभ्यः प्रबला । लिङ्गादिषु न प्रत्यक्षो विनियोजकः शब्दोऽस्ति किन्तु कल्प्यः । यावच्च तैर्विनियोजकशब्दः कल्प्यते तावत्प्रत्यक्षया श्रुत्या विनियोगस्य कृतत्वेन तेषां कल्पकत्वशक्तेर्व्याहतत्वात् । अत एवैन्द्र्या लिङ्गान्नेन्द्रोपस्थानार्थत्वम् । किन्तु 'ऐन्द्र्यागार्हपत्यमुपतिष्ठत' इत्यत्र गार्हपत्यमिति द्वितीयाश्रुत्या गार्हपत्योपस्थानार्थत्वम् ।। ३३ ।।